UGC Approved Journal No. 49321 Impact Factor : 6.125
Shodh Drishti (An International Peer Reviewed Refereed Research Journal), Vol. 13, No. 10, October, 2022 ISSN : 0976-6650

# पञ्चमभावस्थग्रहाणां फलविवेचनम्

**रंजीत दूबे**
शोधच्छात्र, ज्योतिष विभाग, सं०वि०ध०वि०सं०, का०हि०वि०वि०, वाराणसी

आसृष्टेः प्रलयं यावत् आहोस्वित् मानवजीवनस्य यावत् अस्तित्वमस्ति तावत् क्लेशयुताः जनाः स्वकीयक्लेशोच्छेदनाय निरन्तरं विविधोपायेषु संलग्नाः दृश्यन्ते ।अत्र के सन्त्युपायाः येषां साहाय्येन भवति दुःखोच्छेदनम्। तदुच्यत अस्माकं शास्त्रेष्वपि तादृशी विद्या प्राप्यते यया नूनमेव कष्टकूटनं भवति मानवानाम्| तत्रापि ज्योतिषं हि प्रत्यक्षं शास्त्रं सर्वजनक्लेशशमनपरम्। ज्योतिषे तावत् फलितखण्डे जातकानां द्वादशभावाः विचार्यन्ते । तत्र ग्रहाणां शुभाशुभस्थितिद्वारा जातकस्य सकलजीवनस्य फलादेशो भवति । अत्र द्वादशभावेषु पञ्चमभावो विचारणीयः भवति।

लग्नादस्य भावस्य स्थितिः पञ्चमो भवति। एतत् त्रिकोणमस्ति यस्मिन् सर्वेषां ग्रहाणां शुभफलं मन्यते। अनेन भावेन मुख्यतः सन्तान-स्त्री-प्रेम-निवेशविचार-सर्जनात्मककार्य-परामर्श-चलचित्र-दूरदर्शन-क्रीडा-प्रेमविवाहात्पूर्वपरंप्रेम बालकानां स्वास्थ्यबुद्धिमातृधनभातृणां विचारः क्रियते। शरीरावयवेषु हृदययकृतउदरादिनां सम्बन्धे अनेन भावेन ज्ञानं क्रियते। भावबलस्थितग्रहस्वामिकारकग्रहमित्रग्रहदर्शकग्रहाणां बलाबलानुसारेण उचितफलकथनं भवति। अस्य भावस्य जीवने महत्वपूर्णं स्थानमस्ति।

**पञ्चमभावस्थसूर्यफलम् -**

पञ्चमभावस्थसूर्यस्य फलविवेचनं विभिन्नाचार्यणां मते प्रस्तुयते। सर्व- प्रथमाचार्यभट्टनारायणमतं द्रष्टव्यमस्ति यत् यस्य पञ्चमभावे सूर्यः स्यात्, सः प्रथम सन्तानस्य कष्टं, तीक्ष्णबुद्धिमन्त्रविद्याज्ञाता,लुण्ठककार्ये सङ्ग्रहकरणे चतुरोऽपरिपक्वो असावधानश्च भवति। तस्य मृतयुः हृदयरोगेन भवति।[1] अस्य भावस्य पृथक् फलादेशस्यावलोकनमपि द्रष्टव्यम्-सारावल्यां आचार्यैरुक्तं यत् जन्मकाले यदि पञ्चमभावे सूर्यः स्यात्तु सुखपुत्रद्रव्यैर्विरहीनः, कृषकः, पर्वत-दुर्गयोर्भ्रमणप्रिय, सेवकः चञ्चलो मेधावी, धनरहितोऽलपायुश्च भवति।[2] अनेन प्रकारेण जातकपारिजाते उक्तं यत् यदि सूर्यः पञ्चमभावे स्थितः स्यात्तु जातको राजप्रियः चञ्चलः प्रवासी च भवति।[3] मानसागर्यनुसारेण यदि पञ्चमभावे सूर्यः स्यातु सो जातको बाल्यकाले दुःखी, युवावस्थायां धनरहितः, रोगी च भवति। अपत्यैकयुक्तः, परगृहनिवासी, वीरः, चञ्चलः, बुद्धिमान्, विलासी, क्रूरकर्मा दुष्टहृदयी च भवति।[4]

**निष्कर्षः -**

प्रायः शास्त्रकाराणां मतमस्ति यत् अल्पसन्ततिः, एतत् फलं पञ्चमभावस्थितः सूर्यस्यास्ति। पुरुषराशेः स्यात्तु एतानि फलानि प्राप्यन्ते। कर्कवृश्चिकमीनेषु रविः स्यात्तु शरीरिकं कष्टं दुःखञ्च भवति। दुष्टबुद्धिर्दुष्कर्मक्रोधीकुरुपकुशील दुष्टव्यहारयुक्त एतानि फलानि तया प्राप्यत्ते यदा रविः वृषकन्यामकरेषु स्यात्। मेषसिंहधनुराशिषु पञ्चमभावस्य रविः स्यात्तु शिक्षा पूर्णा भवति। मेषस्य सूर्येण सन्तानः न भवति। सिंहे स्यात्तु सन्तानः भवति किन्तु शीघ्रैव मृत्युतुल्यकष्टं भवति। यदि पितृभ्यां लाभकारी न भवति। तस्य सन्तानस्य भाग्योदयः पितृभ्यां पश्चाद् भवति। न्यूनशिक्षितोऽपि

---

[1] सुतस्थावगे पूर्वजापत्यतापी कुशाग्रा मतिर्भास्करे मन्त्रविद्या।
रतिर्वञ्चनो संचकोऽपि प्रमादी मृतिःक्रोडरोगादिजासचाभावनीया ॥चमत्कारचिन्तामणिः॥

[2] सुखसुतवित्तविहीनः कर्षणगिरिदुर्गसेवकश्चपलः।
मेधावी धनरहितः स्वल्पायुः पञ्चमे तपने॥सारावली 30/06॥

[3] राजप्रियश्चञ्चलबुद्धियुक्तः प्रवासशीलः सुतगे दिनेशः॥जातकपारिजात 08/71॥

[4] तनयगतदिनेशे शैशवेदुःखभागी न भवति धनभागी यौवने व्याधियुक्तः।
जनयति सुतमेकं, चान्यगेहश्च शूरश्चपलमतिविलासी क्रूरकर्मा कुचेताः॥ मानसागरीग्रहों के फल–48

व्यवहारकुशलो भवति। धनो: रवि: शिक्षायै सम्यक् भवति। यदि पञ्चम: रवि: वृषकन्यामकरकर्कवृश्चिकमीनेषु स्यात्तु मनुष्य: स्वार्थपारायण:, कृपण:, परसुखदु:खचिन्तको न भवति। मिथुनतुलाकुम्भेषु च रवि: स्यात्तु विद्याविलासी, लेखक: प्रकाशकादिनां व्यापारकर्त्ता च भवति।

**पञ्चमभावस्थचन्द्रफलम् -**

चमत्कारचिन्तमण्यनुसारेण यस्य जन्मकुण्डल्यां पञ्चमभावे चन्द्रमा स्यात्तु निर्मलबुद्धि:, रत्नमण्यादिनां लाभं भूमिसुखं प्राप्नोति। व्यापारेण धनं प्राप्नोति।[1] तदनन्तरं सारावलीग्रन्थे विद्यते यत् जन्मकाले यदि पञ्चमभावे चन्द्र: स्यात्तु विद्या-वस्त्रान्नानांस ङ्ग्रहकर्त्ता, बहुपुत्र-सौम्यमित्रैर्युक्त:, मेधावी भवति।[2] अनेन प्रकारेण जातकपारिजाते वर्तते यत् यदि चन्द्रमा पञ्चमाभावगत्स्यात्तु जातको मन्त्राक्रियाषु रूचियुक्त:, दयालु:, मनस्वी च भवति।[3] मानसागर्यनुसारेण पञ्चमभावे चन्द्रमा स्यात्तु जातक: धनै: परिपूर्ण: सुखबह्वपत्ययुक्त:, मनोनुकूल स्त्रीयुक्तश्च भवति। यदि चन्द्रमा तीक्ष्ण: स्यात् अथवा पापग्रहशत्रुग्रहयो राशौ स्यात्तु स्त्रीसुखपुत्रपौत्रैरहितो भवति।[4]

**निष्कर्ष: -**

चमत्कारचिन्तामण्यां सर्वाणिशुभफलाने युक्तम्। एतेषामनुभवं पुरुषराशिषु भवति। शुभफलानामनुभवपुरुषराशिषु अशुभफलानामनुभवञ्च स्त्रीराशिषु भविष्यति। वृषकन्यामकरराशिषु चन्द्र: स्यात्तु कन्यानामधिक्यं भवति, पुत्रसन्तति: विलम्बेन भवति। मिथुनतुलाकुम्भेषु चन्द्र: स्यात्तु पुत्र-सन्तते: दुष्कर भवति। प्राय: कन्या भवति। कर्कवृश्चिकमीनमेषसिंहधनुराशिषु चन्द्र: स्यात्तु प्रथम: पुत्र: पुन: कन्या, तदनन्तर पुनरेत्र: एवं क्रमेण सन्तति: भवति। कर्कवृश्चिकमीनराशिषु चन्द्र: स्यात्तु बहुपुत्रा: भवितुमर्हति। मेषसिंहधनेषुचन्द्र: स्यात्तु शिक्षा अपूर्णा भवति। वृषकन्यामकरेषु शिक्षा सम्यक् भवति। कर्कवृश्चिकमीनेषु चन्द्र: स्यात्तु मनुष्योऽधिवक्ताचिकित्सकश्च भवितुं शक्नोति। पञ्चम: चन्द्रमा उच्चराशे: नीचराशे: वा दूषित: स्यात्तु एकाया: कन्याया: सांसारिकं सुखं नष्टं भवति। शरीरे व्यङ्गमपि भवितुमर्हति येन कारणेन विवाह: संभवन्न भवति। यदा पञ्चमभावेन सन्ततिविचार: क्रियेत् तु पतिपत्यो: द्वयो: कुण्डलीविचार: साकं क्रियेत्, यतो हि प्राय: एकस्या: वा कुण्डल्या: विवेचितं फलमनुभवे न भवति।

**पञ्चमभावस्थभौमफलम् -**

पञ्चमभावस्थ भौमस्य फलविवेचनं विभिन्नाचार्याणां मते प्रस्तुयते। आचार्यभट्टनारायणस्य नुसार यदि जातकस्य जन्मकुण्डल्यां पञ्चमभावे भौम: स्यात् पाचनशक्ति बलवती भवति। सऽधिकं भोजनं करोति। पापकर्मं तस्मै रोचते। मनसि सदा सन्तप्तो भवति। तेनोत्पन्नोऽनष्टं भवति।[5] तदनन्तरं सारावलीग्रन्थे कथ्यते यत् जन्मकाले पञ्चमभावे भौम: स्यात्तु मनुष्य: सरल:, धनवान्, पुत्रवान्, मित्रैर्युक्त:, चञ्चल:, बुद्धिमान् अनर्थकारी, पापी, अशान्त:, दुष्टश्च भवति।[6] क्रूर:, यात्राप्रिय:, साहिसी, परायण:, विमुख:, भोगादिषु लिप्त:, धनवान् च भवति।[7] मानसागर्यनुसारेण पञ्चमभावे यदि

---

1 यदा पञ्चमे यस्य नक्षत्रनाथो ददातीह सन्तानसंतोषमेव।
मिर्त निर्मलां रत्नलाभं च भूमि कुसीदेन नानाप्तयो व्यावसायात् ॥चमत्कारचिन्तामणिः॥

2 चन्द्रे भवति न शूरो विद्यावस्त्रान्नसङ्ग्रहणशीलः।
बहुतनयसौम्यमित्रोमेधावी पञ्चमे तीक्ष्णः ॥सारावली 30/18॥

3 मन्त्रक्रियासक्तमना दयालुर्धनी मनस्वी तनये सतीन्दौ ॥जातकपारिजात08/71॥

4 तनयगतशशाङ्क वित्तपूर्णः सुखी स्याद्बहुतरसुतयुक्तो वश्यनारीसमेतः।
यदि भवति शशाङ्कः क्षीणपापारिगेहे युवतिसुखसमूहैः पुत्रपौत्रविहीनः ॥मानसागरीग्रहों के फल–60॥

5 कुजे पञ्चमे जाठराग्निर्बलीयान् न जातं नु जातं निहन्त्येक एव।
तदानीमनल्पा मतिः किल्विषेऽपि स्वयं दुग्धवत्तप्यतेऽन्तः सदैव॥ चमत्कारचिन्तामणिः॥

6 सौम्यार्थपुत्रमित्रश्चलमतिरपि पञ्चमे कुजे भवति।
पिशुनोऽनर्थप्रायः खलश्च विकलो नरो नीचः ॥सारावली 30/18॥

7 क्रूरोऽटनश्चपलसाहसिकोविधर्मीभोगी धनी च यदि पञ्चमगे धराजे। जातकपारिजात 08/72

भौम: स्यात्तु जातक: सन्तानहीन:, पापी, अत्यन्तदु:खी च भवति। यदि भौम स्वराशौ उच्चराशौ वा स्थित: स्यात्तु दुर्बल: मलिनशरीरी एकपुत्रवान् च भवति।[1]

**निष्कर्ष: -**

सर्वै: शास्त्रकारौ: प्रायोऽशुभफलमुक्तम्, एतानि पुरुष राशिषु भवन्ति। यदि किञ्चद् शुभफलमस्ति तानि मकरराशिं विहाय अन्येषु स्त्रीराशिषू सन्ति। सवार्णि अशुभफलानि पुरुषराशिणां तथा च मकरराशे: सन्ति। परासरमते पञ्चम: भौम: पितृमारको भवति। किन्तु पञ्चमस्थान: पितु: स्थानं नास्ति भौमश्च पितृकारको नास्ति। दशमस्थानात् पञ्चमअष्टमस्थानौ सत: संभवत: पराशरस्य एतत् मन्तव्यमस्ति स्यात्। मकरं विहाय अन्याषु स्त्रीराशिषु तथा च मिथुनराशौ पञ्चमभौमन सन्तान: भवति, आयुष्मानपि भवति। प्रथम पुत्रस्य अल्पायु। अन्याषु राशिषु गर्भपात: पञ्चमवषां प्राक् मृत्युभवति। एतद्फलयुक्तम् । एतस्य प्रत्यय: मातृजन्मकुण्डल्या: भवितुमर्हति। स्त्रीं सन्ततिप्रबन्धकरोगमपि भवति, मासिक धर्मस्य समस्य पि भवति, योनिसम्बन्धीरोगै: कारण भवितुं शक्नोति। अपत्याभावे विभिवन्ना: विषया: विचारणीया:। पञ्चमे भौम: स्यात्तु अयं कीर्तियोग:, मेष:, सिंहधनुराशिषु पञ्चमभावस्य भौम: स्यात्तु सैन्यविभागोऽऽ रक्षकविभागो विमाननविद्यायन्त्रचालकयान्त्रिकनां शिक्षां प्राप्नोति।

**पञ्चमभावस्थबुधफलम्**

चमत्कारचिन्तामण्यनुसारेण पञ्चमभावे बुध: स्थित: स्यात्तु वयस्य पूर्वाधे पुत्रो न भवति। तस्य बुद्धि: धनाजने कुशलो भवति। सोऽभिचारं कार्यं सम्पादयति। एतद् विदूषां मतं वर्तते। स: छल-कपटेषु अपि निपुणो भवति।[2] अस्य भावस्य पृथक् फलादेशस्यावलोकनमपि द्रष्टव्यमस्ति यथा-सारावल्यामाचार्य: कथ्यते यत् जन्मकाल पञ्चमभावे बुध: स्यात्तु मनुष्य: मन्त्रप्रयोगे निपुण:, बहुपुत्रवान्, विद्यासुखप्रभावै: सम्पन्न: प्रसन्नश्च भवति।[3] एवं जातकपारिजाते विद्यते यद्यपि, बुध: पञ्चमभावगत्स्यात्तु जातको मन्त्राभिचारे पटु:, सद्गृहिणीधनविद्यायशबलैर्युक्तश्च भवति।[4] मानसागर्यनुसारेण पञ्चमभावे बुध: स्यात्तु स: व्यक्ति: पुत्रस्त्रीभिर्युक्त: सुखभोगी विकसितपङ्कजवत् सुन्दरमुखाकृति:, सुखी, देवतागुरुब्राह्मणेषु श्रद्धावान् पवित्रात्मा च भवति।[5]

**निष्कर्ष: -**

बुध: सन्तति दायकोस्ति प्रायोऽस्मिन् सर्वे ग्रन्थकाराणामैकमतमस्ति अस्मिन् परिस्थितौ बुधं नपुंसकग्रहसम्बोधनं वस्तुस्थिते: विरुद्धमस्ति। शास्त्रकारै: शुभफलं पुरुषराशिषु मन्यते। अशुभफलं स्त्रीराशिषु भवति। यदि बुध: मिथुन तुलाराश्यो: स्यात्तु अल्पपुत्र: अथवा पुत्राणामभाव:, कन्यायाराधिक्यं एतानि फलानि प्राप्यन्ते। पञ्चमभावस्य बुध: यदि पुरुषराशौ स्यात्तु सुवाणी, तीक्ष्णबुद्धि:, शिक्षाशीघ्रसमाप्ता भवति। अस्य बुधस्य प्रभावेण जातको लेखक:, कवि:, नाटकस्य रचयिता उपन्यासकारश्च भवति। पञ्चमभावस्य बुधो यदि मिथुनतुलाकुम्भराशौ स्यात्तु सन्तति: न भवति। पञ्चमभावस्य बुध: प्रभावोत्पन्य: जातको नम्रो मायावी, एकान्तप्रिय:, लोकेषु समुदायेषु प्रभावशाली भवति।

---

1 तनयभवनसंस्थे भूमिपुत्रे मनुष्यो भवति तनयहोनः पापशीलोऽतिदुःखी।
यदि निजगृहतुङ्ग वर्तते भूमिपुत्रः कृशमलिनशरीरंपुत्रमेकं ददाति ॥ मानसागरीग्रहों के फल - 72

2 वयस्यादिमे पुत्रगर्भो न तिष्ठेद् भवेत्तस्य मेधाऽर्थसंपादयित्री।
बुधैर्भण्यते पञ्चमे रौहिणेये कियद्विद्यते कैतवस्याभिचारम् ॥चमत्कारचिन्तामणिः ॥

3 मन्त्राभिचारकुशलो बहुतनयः पञ्चमे सौम्ये।
विद्यासुखप्रभावैः समन्वितोहर्षसंयुक्तः ॥सारावली 30/42 ॥

4 मन्त्राभिचारकुशलःसुतदारवित्तविद्यायशोबलयुतः सुतगे सति ज्ञे ॥जातकपारिजात 08/72 ॥

5 तनयमन्दिरगे शशिनन्दने सुतकलत्रयुतः सुखभाजनम्।
विकचपङ्कजचारुमुखः सुखी सुरगुरुद्विजभक्तियुतः शुचिः ॥मानसागरीग्रहों के फल–84 ॥

**पञ्चमभावस्थगुरुफलम् -**

पञ्चमभावस्थ गुरो: फलविवेचनं विभिन्नाचार्याणां मते प्रस्तूयते। सर्वप्रथमाचार्यभट्टनारायणस्य मतं प्रस्तौमि यस्त पञ्मभावे गुरुः स्यात्तु तस्य बुद्धिः भोगविलास कार्येषु रमते। स: वक्ता, तार्किक:, स्वक्षरलेखकश्च भवति। तस्य पुत्राणां सहाय्येनापि सीमितधनमेव प्राप्नोति। कार्यसिद्धयवसरे विघ्नबाधानामुपस्थिति: भवति।[1] तदनन्तरं सारावलीग्रन्थे उच्यते यत् जन्मकाले पञ्मभावे गुरुः स्यात्तु मनुष्य: सुखी, पुत्रवान्, मित्रैर्युक्त:, विद्वान्, धैर्यवान्, ऐश्वर्यभोगेऽऽसक्त: सर्वत्र सुखी भवति।[2] अनेन प्रकारेण जातकपारिजाते उल्लिख्यते यत् यदि पञ्चमभावे बृहस्पति स्थित: स्यात्तु गवादिभि: सम्पन्न:, अल्पपुत्रयुक्तो भवति।[3] मानसागर्यनुसारेण सुतभावे अथवा पञ्चमभावे बृहस्पतिः स्यात्तु सो मनुष्य: सहृदयो मित्रगणैरादरप्राप्त:, शास्त्रज्ञ:, सुखी सर्वप्रिय: स्वोपस्तिना आनन्दप्रदायको जायते।[4]

**निष्कर्ष: -**

ग्रन्थकारा: पञ्चमभावगतगुरो: शुभफलं पुरुषराशिषु मन्यन्ते। यदि पञ्चमभावस्य गुरुः कर्कमीनधनुकुम्भेषु स्यात्तु पुत्राभावो भवति कुत्रचित् न्युनपुत्रफलमिति दृश्यते। तेऽपि रोगग्रस्ता: भवन्ति। पञ्चमस्थो गुरुः निष्फलं भवति। एतन्मतं वैद्यनाथस्यास्ति। वृषकर्ककन्यामकरमीनधनुराशिषु यदि पञ्चमस्थो गुरुः स्यात्तु निष्फलतायानुभवं संभवति। एतादृश: पञ्चमस्थस्य गुरो: प्रभावे मनुष्याय कदापि धनलाभं पुत्रलाभञ्च न भवति। एवं पञ्चमस्थ: गुरुः निष्फलमस्ति किन्तु अन्येषु राशिषु स्थानस्यास्य गुरो: फलानुभवं भवति। गर्गवशिष्ठवैद्यनाथै: पञ्मदशमस्थानौ मारकौ मन्येते। गर्गमते रवि: पितरं, चन्द्र: मातरं, भौम: भ्रातरं, बुध: मातुलं, गुरुः मातामह, शुक्र: पितामहं शनि: पुत्रं क्रमेऽस्मिन् मारका: भवन्ति।

**पञ्चमभावस्थशुक्रफलम् -**

चमत्कारचिन्तामण्यनुसारेण यस्य कुण्डल्यां पञ्चमभावे शुक्र: न स्यात्तु स: पुत्रं भूते सति पुत्रसुखं कथं प्राप्तुं शक्नोति, द्रव्यप्राप्तुं तस्य प्रयासो व्यर्थोस्ति। पञ्चमभावे शुक्र: स्यात्तु मन्त्रजापस्य पूर्णफलं कथं प्राप्यते? अध्ययनस्य पूर्णेसति काव्यनिर्माणशक्ति: कुत: प्राप्यते? अर्थात् पञ्चमभावे शुक्र: स्यात्तु स: पुत्रसुखप्राप्ति:, उद्योगेन लाभं, मन्त्रजपअनुष्ठानेषु सिद्धि:, विद्याक्षेत्रे पूर्णता कवित्वशक्तौ वृद्धिश्च भवति।[5] तदनन्तरं सारावलीग्रन्थे विद्यते यत् जन्मकाले पञ्चमभावे शुक्र: स्यात्तु मनुष्य: सुखी, पुत्रवान्, मित्रसम्पन्न:, अतिकामी, महाधनी, अखण्डित:, सचिव: न्यायाधीश्च भवति।[6] अनेन प्रकारेण जातकपारिजाते उक्तं यदपि पञ्चमभावे शुक्र: स्यात्तु जातक: सत्पत्रत्सूित्रयुक्तो, धनी, सुन्दरो भवति अश्वारोहीसेनाया अधिनायको भवति।[7] मानसागर्यनुसारेण पञ्चमभावे शुक्र: स्थित: स्यात्तु जातको बहुभि: सन्तानैर्युक्तो भूत्वाऽपि कन्याया: पत्या आदरं प्राप्नोति। तथा च अतिधनवान्, गुणवान् श्रेष्ठ:, सुन्दरीणां स्त्रिणां प्रेमी च भवति।[8]

---

[1] विलासे मतिर्बुद्धिगे देवपूज्ये भवेज्जल्पकः कल्पको लेखको वा।
निदाने सुते विद्यमानेऽपि भूतिः फलोपद्रवः पक्वकाले फलस्य ॥चमत्कारचिन्तामणिः॥

[2] सुखसुतमित्रसमृद्धः प्राज्ञो धृतिमांस्तथा विभवसारः।
पञ्चमभवने जीवे सर्वत्र सुखी भवति जातः ॥सारावली 30/54॥

[3] मन्त्री गुणी विभवसारसमन्वितः स्यादल्पात्मजः सुरगुरौ सुतराशियाते ॥जातकपारिजात 08/73॥

[4] सुहृदयश्च सुहृज्जनवन्दितः सुरगुरौ सुतगेहगते नरः।
विपुलशास्त्रमतिः सुखभाजनं भवति सर्वजनप्रियदर्शनः ॥मानसागरीग्रहों के फल–96॥

[5] सपुत्रेऽपि किं यस्य शुक्रो न पुत्रे प्रयासेन किं यन्न संपादितोऽर्थः।
व्युदर्के विना मन्त्रमिष्टाशनाभ्यामधीतेन किं चेत्कवित्वे न शक्तिः ॥चमत्कारचिन्तामणिः॥

[6] सुखसुतमित्रोपचितं रतिपरमतिधनमखण्डितं शुक्रः।
कुरुते पञ्चमराशौ मन्त्रिणमथ दण्डनेतारम् ॥सारावली 30/66॥

[7] सत्पुत्रमित्रधनवानतिरूपशाली सेनातुरङ्गपतिरात्मजगे शुके ॥जातकपारिजात 08/73॥

[8] तनयमन्दिरगे भृगुनन्दने बहुसुतो दुहितुर्वरपूजितः।
बहुधनी गुगवान् वरनायको भवति च पि विलासवतीप्रियः ॥मानसागरीग्रहों के फल– 108॥

**निष्कर्ष: -**

पञ्चमभावगतशुकस्य फलं शुभं मन्यते एवं प्राय: सर्वेषां ग्रन्थकाराणां मतमस्ति। एतद् स्पष्टं भवति। नितान्तं शुभफलमेव भवति अशुभफलं कदापि न भवति एवं कथन युक्तियुक्तो न भविष्यति क्वचिद्शुभफलमपि अनुभयते। यदि शुक्र पुरुषराशौ स्यात्तु पुत्रा: भवन्ति कन्या एकैव भवति एषा एका कन्यापि पुत्राणामनन्तरं भवति। क्वचित् एकापि कन्या न भवति। यदि शुक्र: मेषसिंहधनुराशिषु स्यात्तु एतस्य शुक्रस्य प्रभावे उत्पन्नो व्यक्ति अर्धशिक्षितो भूत्वापि विद्वान् रूपेण पूज्यते। बहुकामुकप्रवृत्या पत्नीव्रतं भूतेऽपि परस्त्रि- भिरवैधं सम्बन्धं निर्माति। सन्ततिस्स्यात् न वा स्यात् उभौ सन्तते: निरपेक्षे भवत:। यथ्सं पञ्चमभावस्य शुक्र: मिथुनतुलाकुम्भराशिषु स्यात्तु ते जना: पूर्णतया शिक्षां प्राप्नोति। एते शिक्षक प्राध्यापकलेखकाश्चापि भवन्ति। एतेषां एकमेव अभिलाषा भवति यत् एतेषां स्त्रीबुद्धिमतीसुशिक्षितामित्रसम्मिता च स्यात्।

**पञ्चमभावस्थशनिफलम् -**

चमत्कारचिन्तामण्यनुसारेण यस्य पञ्चमे भावे शनि: स्यात्तु जातक: सन्तानसम्बन्धीदु:खं प्राप्नोति। तस्य धनं स्थिरं न भवति। तस्य बुद्धि: निर्मला न भवति। देवताशास्त्रान् प्रति च निष्ठा न भवति। कस्मिंश्चिद् विचारणीयविषये मित्तैस्सह कललं भवति।[1] तदनन्तरं सारावलीग्रन्थे उल्लिख्यते यत् जन्मकाले पञ्चमभावे शनि स्यात्तु मनुष्य सुखपुत्रमित्रादिभि: रहितो बुद्धिहीनो (विवेकहीन:) हृदयी, विक्षिप्तवत् सदा दीनो भवति।[2] क्रमेऽस्मिन् जातकपारिजाते भणितम् यत् पञ्चमभावे यदि शनि: स्यात्तु जातको निश्चिन्तो दीर्घायु:, असुखी, चञ्चल:, धर्माचारी, विख्यात: शत्रूञ्जयी च भवति।[3] मानसागर्यनुसारेण पञ्चमभावे यदि शत्रुग्रहस्य राशौ शनि: स्यात्तु जातक: पुत्रधनहीन: दु:खी च भवति। यदि स्वराशौ (१०, ११) उच्चराशौ (७) तथा च मित्रग्रहस्य राशौ शनि: स्यात्तु एक: पुत्रो भवति एतद् किञ्चिदा चार्याणां मतमस्ति।[4]

**निष्कर्ष: -**

सर्वै: आचार्यै: प्राचीनग्रन्थकारा: वा पञ्मभावस्थ शने अशुभफलमेव उक्तम्। पराशरेण पुत्रलाभादिशुभफलमपि भणितम्। पञ्चमस्थान वलवान् त्रिकोण शुभस्थानमस्ति। शनि पापग्रहोऽस्ति। शुभस्थाने शनेस्सदृशपापग्रहस्य स्थिति- रशुभफलदायकरेव भविष्यति। एतत्प्राचीनाचार्याणां मतं विद्यते। किन्तु शुभफलमपि प्राप्यते अत: पञ्चमभावस्य शनि: मिश्रितफलं ददाति, मुख्यतोऽशुभफलं वृष-कन्या–तुलामकरकुम्भेषु प्राप्यते। शुभफलं अन्येषु राशिषु अनुभवं दृष्टिगोचरं भवति। एवं शुभाशुभं सम्बन्धमेव निर्णायकनियामकौ भवितुमर्हति। मेषसिंहयो: पञ्चमस्थ: शनि स्यात्तु शिक्षापूर्णा भवति। शने: कारकत्वे वर्णितविषयेषु निपुणतां आयाति। पञ्चमस्थ: शनि: यदि धनुराशौ स्यात्तु शिक्षाऽपूर्णाभवति। स्वविचारान्वेषणम्, स्वास्थ्ये संशय:, अन्येषु अविश्वास:, समक्षे प्रशंसा अन्यत्र निन्दास्वभावो भवति।

**पञ्चमभावस्थराहुफलम् -**

चमत्कारचिन्तमण्यनुसारेण राहु: यस्य पञ्चमभावे स्यात्तु स: सन्तानसम्बन्धीचिन्तया पीडितो जायते पत्न्या कोपं क्रियते। उदरजन्य: रोगो भवति। औषधप्रयोगेऽपि सफलता न प्राप्यते। दुर्भाग्यवशात् तस्य सर्वे प्रयासा: व्यर्था: भवन्ति।[5] भावप्रकाशानुसारेण यदि राहु: पञ्चमभावे स्यात्तु तं पुत्रलाभो भवति। स्त्री सदाउदरोगेन पीडिता भवति।

---

1 शनी पञ्चमे च प्रजाहेतुदु:खी विभूतिश्चला तस्य बुद्धिर्न शुद्धा।
रतिर्दैवते शब्दशास्त्रे न तद्वत् कलिमित्रतो मन्त्रत: क्रोडपीडा॥चमत्कारचिन्तामणि: ॥

2 सुखसुतमित्रविहीनं मतिरंहितमचेतसं त्रिकोणस्थ:।
सोन्मादं रवितनय: करोति पुरुषं सदा दीनम्॥सारावली 30/78॥

3 मत्तश्चिरायुरसुखी चपलश्चधर्मी ज्ञातो जितारिनिचय: सुतगेऽर्कपुत्रे।जातकपारिजात 08/74

4 शनैश्चरे पञ्चमशत्रुगेहे पुत्रार्थहीनो भवतीह दु:खम् ।
तुङ्ग निजे मित्रगृहे च पङ्गौ पुत्रकभागी भवतीति कश्चित्॥मानसागरीग्रहों के फल– 120॥

5 सुते तत्सुतोत्पत्तिकृत्सिहिकाया: सुतो भामिनीचिन्तया चित्ततापः।
सति क्रोडरोगे किमाहारहेतु: प्रपञ्चेन किं प्रापकाद्दष्टवर्ज्यम्॥चमत्कारचिन्तामणि: ॥

चिन्तासन्तापयो: वृद्धि: भवति। दैवकृपया विना अनेकै: यत्नकरणैरपि अधिकं धनं न लभते।[1] क्रमेऽस्मिन् जातकपारिजातानुसारेण यदि पञ्चमस्थराहु: स्यात्तु जातको भीरुदयालुनिर्धनश्च भवति। यदि केतु: स्यात्तु जातक: शठ: जलेनभीतो रोगी च भवति।[2] मानसागर्यनुसारेण राहु: पञ्चमभावे चन्द्रमसा युक्त: स्यात्तु सन्ताननाशक:, सदैव क्रुद्ध: च भवति। यदि द्वौ गेहान्तरे (पञ्चमभावे राहु: तथा च कस्मिञ्चिदन्ये भावे चन्द्रमा) भवेतां तु मात्रैको मलिन: कुपुत्र: भवति।[3]

**निष्कर्ष: -**

पुत्रभावस्थराहो: फलं कतिपयलेखकौ पुत्र पुत्रादिशुभफलमुक्तम्। अन्यै: पुत्राभावं, पुत्राणां पुत्ररूग्णता, पुत्राय मृत्युवद्कष्टमशुभफलं स्वीकृतम्। अशुभफलं पुरुषराशौ शुभफलानामनुभवं स्त्रीराशिषु प्राप्यते। पञ्चमस्थ: राहु: यदि पुरुषराशिषु स्यात्तु व्यक्ति: बुद्धिमान्, कीर्तिमान् किन्तु अभिमानी च भवति। शिक्षा अभियन्त्रिकी भवति। अत: सफलता न प्राप्यते। व्यवसायायपि राहु: सफलदायको न भवति। स्त्रीसुखपुत्रसुखभ्यामपि राहु: सम्यक् न भवति। द्वितीय: विवाहो भवति। यदि राहुरति अशुभयोगे स्यात्तु विवाह: न भवति, अवैध स्त्री सम्बन्धं भवति। राहो: स्त्रीपुत्रसुखाभावे संशोधनादिषु कार्यषु मग्नो भवति एतेषां अप्त्या: ग्रन्थारेव भवन्ति अनेनैव एते यशस्वीन: प्रसिद्धाश्च भवन्ति। एषो राहु स्त्रीराशिषु स्यात्तु व्यक्ति: शान्तो विवेकी-विरक्तश्च च भवति। सम्यक् शिक्षितभूते एते लेखनकलायां कुशला: भवन्ति।

**पञ्चमभावस्थकेतुफलम् -**

पञ्चमभावस्यकेतो: फलविवेचनं विभिन्नाचार्याणां मते प्रस्तूयते। सर्वप्रथमाचार्यभट्टनारायणमतं द्रष्टव्यमस्ति यत् यदि पञ्चमभावे केतु स्यात्तु जातकस्य भातृन् शास्त्राघातै कष्टं भवति। सदा तस्य मति: भ्रमिता भवति तथा च अल्पपुत्रोत्पतिश्च भवति। अत्यन्त तेजस्वीबलवान् सत्वेऽपि दासवृत्तिा: च भवति।[4] तदनन्तरं भावप्रकाशग्रन्थे उच्यते यत् यदि केतु: पञ्चमभावे स्यात्ते तस्य सहोदरान् भातृन् बहुधा शास्त्रधातै: कष्टं ददाति। स्वमते: कारणेन तं बहुपीडापि भवति। पुत्रेन सह निन्तरं कलहेन पुत्रसुखं न प्राप्नोति।[5] अनेन प्रकारेण जातकपारिजाते भणितम् यत् यदि पञ्मभावे राहु: स्यात्तु जातको भीरु:, दयालु:, निर्धनश्च भवति तथा च जातक: शठ: (प्रकृत्या दुष्ट: जलेन भयभतो रोगी च भवति।[6] मानसागर्यनुसारेण यदि पञ्मभावे केतु: स्यात्तु भातृन् क्षतवायुविकारेण कष्टम्, सदैव स्वबुद्धया व्यथा (अस्वकल्पनया कष्टं) अल्पपुत्रसेवकैर्युक्त:, बली च भवति।[7]

---

[1] सुते सिंहीपुत्रे जनुषि सुतलाभः प्रभवति कान्ताया उदरभवरोगैर्विकलता।
तथा चिन्ता तापः प्रसरति जनानामतितरां विना दैवं यत्नैः किमिति बहुलाभः क्षितिपतेः ॥भावप्रकाश: 02/05

[2] भीरुर्दयालुरधनः सुतगे फणीशे केतौ शठः सलिलभीरुरतीव रोगी ॥जातकपारिजात 08/74

[3] राहुः सुतस्थः शशिनानुगो हि पुत्रस्य हा कुपितः सदैव।
गेहान्तरे सोऽपि सुतैकमात्र दत्ते प्रमाणं मलिनं कुचैलम् ॥मानसागरीग्रहों के फल–132 ॥

[4] यदा पञ्चमे राहुपुच्छं प्रयाति तथा सोदरे घातवातादिकष्टम् ।
स्वबुद्धिव्यथा सन्ततं स्वल्पपुत्रः स दासो भवेद्वीर्ययुक्तो नरोऽपि ॥चमत्कारचिन्तामणिः

[5] यदा राहोः पुच्छे भवति किल सन्तानभवनेसहोत्थानां शस्त्रक्षतजनितकष्टं हि बहुधा ।
स्वबुद्ध्या पीडापि प्रभवति जनानामतितरांतथापत्यादल्पं सुखमनुदिनं तत्कलहतः ॥भावप्रकाश: 02/05

[6] भीरुर्दयालुरधनः सुतगे फणीशे केतौ शठः सलिलभीरुरतीव रोगी ॥जातकपारिजात 08/74

[7] यदा पञ्चमे राहुपुच्छं प्रयाति तदा सोदरे घातवातादिकष्टम् ।
स्वबुद्धिव्यथा सतत स्पल्पपुत्रः सदासो भवेद्वीर्ययुक्तो नरोऽपि ॥मानसागरीग्रहों के फल – 144